See Bring about.—(Bring word) निविद् in caus. (-वेदयति -यितुं), वार्त्ताम् or संवादम् आख्या (c. 2. -ख्याति -ख्यातुं), संवद् in caus. (-वादयति -यितुं).—(Bring an action against) अभियुज् (c. 7. -युनक्ति -योक्तुं), विवादास्पदीकृ.

Bringer, *s.* आनेता *m.* (तृ), उपानेता *m.* (तृ), आवहः in comp.

Brinish or briny, *a.* लवणः -णा -णं, लावणः -णी -णं, क्षाररसः -सा -सं.

Brinishness, *s.* लावण्यं, लवणत्वं, क्षारता, क्षाररसः.

Brink, *s.* (Of a river) तीरं, कूलं, तटं, कच्छः.—(Of any thing) प्रान्तः, अन्तः -न्तं, उपान्तं, पर्य्यन्तं, धारः -रा.—(Of a precipice) उत्सङ्गः, शैलकटकः.

Brisk, *a.* लघुः -घुः -घु, त्वरितः -ता -तं, अविलम्बः -म्बा -म्बं, क्षिप्रः -प्रा -प्रं, अतन्द्रः -न्द्रा -न्द्रं, प्रफुल्लः -ल्ला -ल्लं.—(Powerful, spirituous) प्रबलः -ला -लं, तीव्रः -व्रा -व्रं, तैजसः -सी -सं, सारवान् -वती -वत् (त्), सौरिकः -की -कं; 'a brisk shower,' धारासम्पातः.

Brisket, *s.* पशोर् वक्षः *n.* (स्), or उरः *n.* (स्), or वक्षस्स्थलं.

Briskly, *adv.* त्वरितं, क्षिप्रं, सत्वरं, प्रयत्नतस्, सारतस्, अविलम्बितं, अतन्द्रितं, बलवत्.

Briskness, *s.* लाघवं, क्षिप्रत्वं, शीघ्रता, अविलम्बता.—(Vigour) तेजः *n.* (स्), सारता, सत्त्वं, तीव्रता.

Bristle, *s.* शूकः -कं, दृढलोम *n.* (न्), स्तम्बरोम *n.* (न्), रोम *n.* (न्), सूचिः *f.*—(Of a hog) शूकरलोम *n.* (न्).

To **bristle**, *v. n.* शूकवत् or शूकरलोमवद् हृष् (c. 4. हृष्यति, हर्षितुं) or पुलकितः -ता -तं or उन्नतः -ता -तं or उन्नतः -ता -तं भू or स्तम्बीभू; शूक (nom. शूकायते), पुलक (nom. पुलकायते); 'the hairs of his skin bristled up,' तस्य रोमाण्य् अहृषन्.

Bristling, *part.* हृषितः -ता -तं, हृष्टः -ष्टा -ष्टं, पुलकितः -ता -तं, पुलकी -किनी -कि (न्), दन्तुरः -रा -रं; 'bristling hairs,' हृषितानि रोमाणि.

Bristly, *a.* शूकी -किनी -कि (न्), शूकवान् -वती -वत् (त्), सूचीरोमा -मा -म (न्), दृढलोमा -मा -म (न्), स्तम्बरोमा -मा -म (न्).

Britain, *s.* (The white island) श्वेतद्वीपः.

British, *a.* पूर्व्वोक्तदेशसम्बन्धी -न्धिनी -न्धि (न्).

Brittle, *a.* भङ्गुरः -रा -रं, भिदुरः -रा -रं, भिदेलिमः -मा -मं, सुखभेद्यः -द्या -द्यं, भेद्यः -द्या -द्यं, खण्डनीयः -या -यं, सुभङ्गः -ङ्गा -ङ्गं, कोमलः -ला -लं.

Brittleness, *s.* भङ्गुरता -त्वं, सुभङ्गता, भिदुरत्वं, खण्डनीयता, भेद्यता, कोमलता.

Brize, *s.* दंशः, दंशकः, वनमक्षिका, गोमक्षिका.

Broach, *s.* (A spit) शूलः, शलाका, शल्यं, शङ्कुः *m.*—(An ornament). *See* Brooch.

To **broach**, *v. a.* (To spit) शूल् (c. 1. शूलति, शूलितुं), शूलाकृ.—(To tap a vessel) मद्यादिस्रावणार्थं सुराभाजने छिद्रं कृ, मद्यादिमोचनार्थं भाण्डं छिद्र् (c. 10. छिद्रयति -यितुं).—(To open) विवृ (c. 5. -वृणोति -वरितुं -वरीतुं), अपावृ, उद्घट् (c. 10. -घाटयति -यितुं).—(To give out, utter) उच्चर् in caus. (-चारयति -यितुं), प्रचर्, प्रकाश् in caus. (-काशयति -यितुं), निविद् in caus. (-वेदयति -यितुं), प्रचलीकृ.

Broad, *a.* (Wide, large) पृथुः -थुः -थु, विशालः -ला -लं, विपुलः -ला -लं, प्रस्थः -स्था -स्थं.—(Spacious, expanded) विस्तीर्णः -र्णा -र्णं, विततः -ता -तं.—(Coarse) असभ्यः -भ्या -भ्यं, अपरिष्कृतः -ता -तं, अशुद्धः -द्धा -द्धं.—(Indelicate) अवाच्यः -च्या -च्यं, गर्हितः -ता -तं; 'to make broad,' प्रथ् (nom. प्रथयति -यितुं); 'broad-waisted,' पृथुमध्यः -ध्या -ध्यं.

Broad-awake, *a.* प्रजागरः -रा -रं, प्रबुद्धः -द्धा -द्धं, उन्निद्रः -द्रा -द्रं.

Broad-breasted, *a.* व्यूढोरस्कः -स्का -स्कं, उरस्वान् -स्वती -स्वत् (त्), उरसिलः -ला -लं.

Broad-brimmed, *a.* पृथुधारः -रा -रं, विशालाञ्चलः -ला -लं, विपुलधारः -रा -रं.

Broad-cloth, *s.* अधुनातनजनैर् भृतं मेषलोमनिर्म्मितं सूक्ष्मवस्त्रं.

To **broaden**, *v. n.* प्रथ् (c. 1. प्रथते, प्रथितुं), विप्रथ्, विस्तृ in pass. (-स्तीर्य्यते).

Broadness, *s.* पृथुता, पार्थवं, प्रथिमा *m.* (न्), विशालता, विस्तारः, विस्तीर्णता, विपुलता, प्रस्थता, परिसरः, पाटः.—(Coarseness) असभ्यता, अशुद्धता, अवाच्यत्वं, गर्ह्यता.

Broad-shouldered, *a.* पृथुस्कन्धः -न्धा -न्धं, अंसलः -ला -लं, पृथुबाहुः -हुः -हु.

Broadside, *s.* नौपार्श्वः -र्श्वं, नौकापार्श्वः, पोतपार्श्वः.—(Volley of shot) सामुद्रयुद्धसमये ये लोहगोलका एककाले नौकापार्श्वात् प्रक्षिप्यन्ते.

Broadsword, *s.* पृथुपत्रः खड्गविशेषः, पृथुफलकविशिष्टः कृपाणः.

Brocade, *s.* सुवर्णरूप्यतन्तुस्यूतं दुकूलं, काम्मिकवस्त्रं, नानावर्णकौशाम्बरं.

Brocaded, *a.* चित्रदुकूलाम्बरः -रा -रं, नानावर्णदुकूलालङ्कृतः -ता -तं.

Brocage, brokage, or brokerage, *s.* (The profit gotten by promoting bargains) शुल्कः -ल्कं, पारितोषिकं, क्रेतृविक्रेत्रोर्मध्ये पणसम्पादकेन गृहीतं शुल्कं or मूल्यं, परकार्य्यनिर्व्वाहणात् प्रति निरूपितप्रतिफलं, पणप्रयोजकपारितोषिकं.—(The trade of dealing in old things) जीर्णद्रव्याणां क्रयविक्रयः.—(The transaction of business for other men) परस्य कृते पणाया or पणसम्पादनं, परकार्य्यनिर्व्वाहः.

Brocoli, *s.* शाकप्रभेदः, हरितकभेदः, शिग्रुः *m.*, पोतकी.

Brocket, *s.* द्विवर्षीणस् ताम्रतनुविशिष्टो हरिणप्रभेदः.

Brogue, *s.* भ्रष्टभाषा, प्राकृतभाषा, अपशब्दः, अशुद्धोच्चारणं, असभ्यव्याहरणं, म्लेच्छभाषा.—(A kind of shoe) चर्म्मपादुकाविशेषः.

To **broider**, *v. a.* सूच्या पुष्पाद्यलङ्कारान् सिव् (c. 4. सीव्यति, सेवितुं) or निषिव्, or चित्र् (c. 10. चित्रयति -यितुं) or लिख् (c. 6. लिखति, लेखितुं).

Broidery, *s.* सूचिकर्म्म *n.* (न्), सूचिता, सूच्या पुष्पाद्यलङ्कारसीवनं.

Broil, *s.* (A quarrel) कलहः, द्वन्द्वं, विरोधः, व्यवक्रोशनं, कलिः *m.*, तुमुलं; 'to raise broils,' कलह (nom. कलहायते).

To **broil**, *v. a.* भ्रस्ज् (c. 6. भृज्जति, भर्ष्टुं), भृज् (c. 1. भर्जते, भर्जितुं), ऋज्र (c. 1. ऋज्रते, ऋज्रितुं).

To **broil**, *v. n.* (To be hot) तप् in pass. (तप्यते), पच् in pass. (पच्यते).

Broiled, *p. p.* भर्जितः -ता -तं, भृष्टः -ष्टा -ष्टं, तप्तः -प्ता -प्तं.

To **broke**, *v. n.* पणं or परकार्य्याणि सम्पद् in caus. (-पादयति -यितुं) or सिध् in caus. (साधयति -यितुं); परार्थं पण् (c. 1. पणते, पणितुं or पणायति -यितुं).

Broken, *p. p.* भग्नः -ग्ना -ग्नं, भिन्नः -न्ना -न्नं, खण्डितः -ता -तं, रुग्नः -ग्ना -ग्नं, विदीर्णः -र्णा -र्णं, शकलीकृतः -ता -तं, विघट्टितः -ता -तं, त्रुटितः -ता -तं.—(Trained) विनीतः -ता -तं, दमितः -ता -तं.

Broken-hearted, *a.* भग्नहृदयः -या -यं, दलद्धृदयः -या -यं, विदीर्णहृदयः -या -यं, भग्नान्तःकरणः -णा -णं, शोकाकुलः -ला -लं, भग्नाशः -शा -शं.

Broken-kneed, *a.* भग्नजानुः -नुः -नु, भिन्नजानुः -नुः -नु.

Broken-winded, *a.* नष्टश्वासः -सा -सं, नष्टप्राणः -णा -णं, यष्टिप्राणः -णा -णं.

Broker, *s.* निरूपितशुल्केन or निरूपितपारितोषिकेण परार्थे क्रेता विक्रेता वा or परार्थे व्यवसायी *m.* (न्) or क्रयविक्रयप्रयोजकः or परकार्य्यनिर्व्वाहकः or परकार्य्यसम्पादकः, घटकः.—(A dealer in old things) जीर्णद्रव्यक्रयविक्रयिकः, जीर्णपरिच्छदक्रयविक्रयी *m.* (न्).

Brokerage, *s.* *See* Brocage.

Bronchial, *a.* कण्ठ्यः -ण्ठ्या -ण्ठ्यं, कण्ठसम्बन्धीयः -या -यं, ग्रैवेयः -यी -यं.

Bronze, *s.* कांस्यं, पित्तलं, ताम्रं, रीतिः *f.*, रेत्यं, आरः.

To **bronze**, *v. a.* पित्तलीकृ, ताम्रसात्कृ, पित्तलरूपेण कठिनीकृ.

Bronzed, *p. p.* ताम्रसात्कृतः -ता -तं, रैत्यः -त्यी -त्यं, कांस्यतुल्यः -त्या -त्यं.